# अलङ्कारसम्प्रदायः

डॉ. सुरेशकुमार टी. व्यास
प्राध्यापक,
दर्शनम् संस्कृत महाविद्यालय
छारोडी, अहमदाबाद

## १. प्रस्तावना

अलङ्कारशास्त्रपरम्परायाः पर्यालोचनेन बुद्ध्यते यदत्र विचारभेदात् कतिपये वर्गाः सञ्जाताः तेषां परिचयार्थं तन्मतानि विवेचनीयानि भवन्ति । अलङ्कारसर्वस्वस्वटीकाकृता समुद्बन्धेनोक्तम् –

**इह विशिष्टौ शब्दार्थौ काव्यम्, तयोश्च वैशिष्ट्यम्, धर्ममुखेन, व्यापारमुखेन, व्यङ्ग्यमुखेन वेति त्रयः पक्षाः । आद्येऽलङ्कारतो गुणतो वेति द्वैविध्यम् । द्वितीयेऽपि भणितिवैचित्र्येण भोगकृतेन वेति द्वैविध्यम् । इति पञ्चसु पक्षेष्वाद्योद्भटादिभिरङ्गीतः द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन पञ्चम आनन्दवर्धनेन ।**

अयम् आशयः **रमणीयौ शब्दार्थौ** काव्यनाम्ना व्यपदिश्येते, शब्दार्थयो रमणीयता च धर्ममुखेन यद्युच्यते तदा गुणा अलङ्कारश्चेति द्वौ तादृशौ धर्मौ स्वभावतः तत्र गुणकृतवैशिष्ट्यवादिनौ दण्डिवामनौ काव्यस्य जीवनाधायकं गुणमाहतुः अलङ्कारकृतं वैशिष्ट्यं वदन्तः उद्भटादयश्चालङ्कारान् काव्यजीवनाधायकान् स्वीकुर्वन्ति । यदि च शब्दार्थयो रमणीयता तद्व्यापार द्वारा मन्यते तदापि व्यापारो द्विविधः सम्भवति भणितिवैचित्र्यमूलो भोगकृत्वमूलश्च तत्र भणितिवैचित्र्यकृतं वैशिष्ट्यमभ्युपगच्छन्तः कुन्तकादयो **वक्रोक्तिः काव्यजीवितम्** इति मन्यन्ते, भोगकृत्वमूलकं वैशिष्ट्यं मन्यमानाश्च भट्टनायकादयो भोजकत्वरुपं व्यापारान्तरं मन्यन्ते । तदेव तत्र वैशिष्ट्यमभ्युपगच्छन्ति । भट्टनायको रससम्प्रदायान्तर्गत एव । केवलं भोजकत्वव्यापारभामहस्य नूतनम् । ये पुनर्व्यङ्ग्यमुखेन शब्दार्थयोः वैशिष्ट्यमाहुः ते ध्वनिप्रस्थानं स्वीकुर्वन्ति । यथा आनन्दवर्धनाचार्यादयः । एवमत्र शास्त्रे बहवः सम्प्रदायाः प्रचलिताः ते यथा –

- रससम्प्रदायः
- अलङ्कारसम्प्रदायः
- रीतिसम्प्रदायः
- वक्रोक्तिसम्प्रदायः
- ध्वनिसम्प्रदायः
- औचित्यसम्प्रदायः

एषु षट्सु सम्प्रदायेषु द्वितीय-सम्प्रदायः अलङ्कारसम्प्रदायः वर्तते । अधुना कौशिकीऽयं सविस्तरेण व्याख्याम्। अलङ्कारव्युत्पत्तिं तत्स्वरुपं एवं विविधाचार्याणामलङ्कारलक्षणानि प्रतिपादितानि ।

आचार्यो भामहः अलङ्कारवादस्य प्रथमः आचार्यः अनेन कृतः काव्यालङ्कारो नाम ग्रन्थः सुप्रसिद्धः अस्ति। तदनुसारं – **न कान्तमपि निर्भूषं विभाति वनितावनम्** इति । यथा कुण्डलकटकाद्यलङ्काराः भौतिकशरीरमलङ्कुर्वन्ति तथैव शब्दार्थरूपकाव्यशरीरमुपमाद्यलङ्काराः उपकुर्वन्ति, अर्थात् काव्यस्यात्मा अलङ्काराः भवन्ति । असौ शब्दार्थवक्रतयायुक्तं कथमलङ्कारमनन्यत –

**वक्राभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृति ।**
**वाचां वक्रार्थशब्दोक्तिरलङ्कराय कल्पते ।। - ( काव्यालङ्करः )**

आचार्यो दण्डी काव्यशोभाकरान् अलङ्कारान् प्रत्यपादयत् ।

**काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते ।**
**ते चाद्यापि विकल्प्यन्ते कस्तेन कार्त्स्न्येन वक्ष्यति ॥ – ( काव्यादर्शः )**

ते चाद्यापि विकल्प्यन्ते कस्तेन कार्त्स्न्येन वक्ष्यति अग्निपुराणेऽपि काव्यम् – **अर्थालङ्काररहिता विधवेव सरस्वती** इति कथितम् । यद्यपि वामनः **रीतिरात्मा काव्यस्य** इति प्रत्यपादयत् तथापि सः **काव्यं ग्राह्यमलङ्कारात्** इति कथयित्वा अलङ्काराणां महत्वं काव्ये स्वीकृतवान् । तदनुसारं काव्यशोभायाः कर्तारो धर्माः गुणा किन्तु तदतिशयहेतवस्त्वलङ्काराः।

**२. काव्यालङ्कारसूत्रवृत्तिः**

उद्भटोऽपि काव्येऽलङ्काराणामेव प्रधानतां प्रत्यपादयत् । सः रसवत् पेय उर्जस्वि समाहितान् अलङ्कारेष्वेव समाविष्टान् अकरोत् । रुद्रटोऽपि काव्ये अलङ्कारप्राधान्यं स्वीकृतवान् अस्यप्रसिद्धो ग्रन्थः काव्यालङ्कारः अस्ति । वक्रोक्तिसम्प्रदायस्य प्रवर्तक आचार्य कुन्तकोऽपि अलङ्कारप्राधान्यमङ्गीकृतवान् ।

**अलङ्कृतिरलङ्कार्यमपोद्धृत्य विवेच्यते ।**
**तदुपायतयां तत्त्वं सालङ्कारस्य काव्यता ॥**

भोजराजोऽपि काव्यशोभाकरत्वमलङ्कारस्य सामान्यं लक्षणमुक्त्वा (शोभाभावं) अलङ्काराणामस्तित्वं च स्वीकृतवान् अलङ्कृतस्य काव्यम् इति ।

**३. अलङ्कारशब्दस्य व्युत्पत्तिः**

अलङ्क्रियतेऽनेनेति अलङ्कारः । अर्थात्साधूत्कर्षजनकत्वे सति अतिशयशोभातिशायिकाव्यधर्मत्वम् अलङ्कारत्वमिति । एवञ्च अलङ्क्रियते शब्दः अर्थो वा अनेन इति अलङ्कारः ।

**४. विविधाचार्याणाम् अलङ्कारलक्षणानि**

यथा कविराजविश्वनाथस्य साहित्यदर्पणे –

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः । रसादीनुपकुर्वन्तोऽलङ्कारास्तेङ्गदादिवत् ॥**

मम्मटस्य काव्यप्रकाशे यथा –

**उपकुर्वन्ति ते सन्तं येऽङ्गद्वारेण जातुचित् । हारादिवदलङ्कारास्तेऽनुप्रासासोपमादयः ॥**

दण्डिनः काव्यादर्शग्रन्थे –

**काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते ।**

वामनस्य काव्यालङ्कारसूत्रार्थग्रन्थे यथा –

**तदतिशयहेतवस्त्वलङ्काराः इति तथा च सौन्दर्यमलङ्कारः इति ।**

आचार्यजयदेवस्य चन्द्रालोके

**हारादिवदलङ्कारः सन्निवेशो मनोहरः इति ।**

एवं प्रकारेण अलङ्कारलक्षणानि सम्पाद्य अधुना अलङ्काराणां स्वरुपं सम्प्रति प्रचक्षते ।

**अलङ्कारस्वरूपम्**

साहित्यशास्त्रे अनेके सम्प्रदायाः प्रवर्तन्ते । तेषु च सम्प्रदायेषु एकः अलङ्कारसम्प्रदायः अस्ति । अयमेव प्राचीनसम्प्रदायः मन्यते । अलङ्कारधारणेन यथा शरीरसौन्दर्यं भवति तथैव अलङ्कारनियोजनेन काव्यसौन्दर्यं वृद्धिं प्राप्नोति । उक्तमपि वर्तते यत् **न**

**कान्तमपि निर्भूषं विभाति वनितानम्**। यथा वनितायाः मुखं कमनीयं स्यात् परं भूषणाभावे न शोभते तथैव काव्यं रमणीयमपि अलङ्काराहित्ये न विभाति।

मम्मटादिभिः अलङ्कारविद्भिः अलङ्कारसम्प्रदायः समनुसृतः । यतोहि मम्मटाचार्यैः स्वकीये काव्यलक्षणेऽपि अलङ्कारनिवेशः कृतः वर्तते । यथा **तददोषौ शब्दार्थौ सगुणावनलङ्कृतीः पुनः क्वापि** । अस्मिन् लक्षणे अनलङ्कृती पुनः क्वापि इत्यनेन सर्वत्र सालङ्कारौ क्वचिच्च अस्फुटालङ्कारौ शब्दार्थौ काव्यमित्थं विविच्य स्फुटास्फुटत्वेन अलङ्काराणां द्वैविध्यं अङ्गीकृत्य तेषां काव्येऽनिवार्यत्वं सूचितम् । वक्रोक्तिजीवितकारः कुन्तकः वक्रोक्तिनामकमेकमेव अलङ्कारं स्वीकृत्य काव्ये तस्यैव प्राधान्यं स्वीकुरुते। तेन उक्तं यत् –

**अलङ्कृतिरलङ्कार्य वयोधृत्य विवेच्यते। तदुपायतयातत्त्वं सालङ्कारस्य काव्यता॥**

अस्यां कारिकायां सालङ्कारस्य काव्यता इति उक्त्वा निरलङ्कारस्य काव्यत्वं नास्तीति स्फुटतया भणितं भवति। आचार्यः वामनोऽपि काव्यालङ्कारसूत्राख्ये ग्रन्थे सूत्रं ग्रथ्नाति **काव्यं ग्राह्यम् अलङ्कारात्** । अनेन सूत्रेण गुणालङ्कारहेतुकं काव्योपादानामिति निष्पन्नं भवति। विश्वनाथेनापि प्रोक्तं यत् –

**उत्कर्षहेतवः प्रोक्ताः गुणालङ्काररीतयः ।**

इत्युक्त्वा अलङ्काराणां काव्येषु उपादेयत्वं सूचितम् । **अलङ्क्रियते अनेन** इति करणसाधनोऽयं शब्दः शब्दार्थालङ्कारमभिधत्ते । साहित्यशास्त्राभिधानोऽलङ्कारशब्दस्तु तावद्भावसाधनः **अलङ्कृतिरलङ्कार** इति । अत एव सौन्दर्यालङ्कार इति वचनेन लक्षितं स चैषः खलु अलङ्कारो दोषहानाद् गुणाधानाच्च यशः कामुकस्य कवेः अतिशयसंपाद्यत्वेन विवक्षितः, तस्मात् काव्योत्कर्षाभिभावुकेन कविना दोषाः यत्नतः हातव्याः गुणाश्च पुनराधातव्या भूयसा आयासेन । उक्तं च – **अर्थालङ्काररहिता विधवेव सरस्वती** अतः काव्येषु अलङ्कारप्राधान्यं सर्वैरपि स्वीकृतम् । अलङ्कारमूलन्तु वेदे तदनु अग्निपुराणेऽपि दृश्यते यथा – **स्यादावृत्तिरनुप्रासो वर्णानां पदवाक्ययोः** इति।

अलंक्रियते शब्दः अर्थो वा अनेन इति अलङ्कारः। विश्वनाथः अलङ्कारस्य लक्षणं दर्पणे लिखति –

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः। रसादीनुपकुर्वन्तोऽलङ्कारास्तेंऽगदादिवत्॥**

यथा अङ्गादाद्याभूषधारणेन शरीरशोभा भवति तथैव अनुप्रासोपमाद्यलङ्कारैः शब्दार्थयोः शोभा जायते कारणं शब्दार्थौ काव्यस्य शरीरम्। अत एव अलङ्काराणामुभयत्वं वर्तते। अनेन प्रकारेण अलङ्कारस्वरुपं साहित्यशास्त्रे दृग्गोचरं भवति।